स्त्रीकोपाग्निश्रमांस्त्यजेत्। पथ्यं च लघुमांसानि राजरोगप्रशान्तये'। इति शार्ङ्गधरे पाठः।

मृगाङ्को रसः—

स्याद्रसेन समं हेम मौक्तिकं द्विगुणं भवेत्[1] ।
गन्धकश्च समं तेन रसतुल्यन्तु[2] टङ्कणम् ॥ ८ ॥
तत्सर्वं गोलकं कृत्वा काञ्जिकेन च[3] पेषयेत् ।
भाण्डे[4] लवणपूर्णेऽथ पचेद् यामचतुष्टयम्[5] ॥ ९ ॥
मृगाङ्कसंज्ञको ज्ञेयो राजयक्ष्म[6]निकृन्तनः ।
गुञ्जाचतुष्टयं चास्य मरिचैः सह भक्षयेत् ॥ १० ॥
पिप्पलीदशकैर्वापि मधुना सह लेहयेत् ।
पथ्यन्तु[7] लघुभिर्मांसैः प्रयोगेऽस्मिन् प्रयोजयेत् ॥ ११ ॥
व्यञ्जनैर्घृतपक्वैश्च नातिक्षारै[8]र्हिङ्गुभिः ।
एलाऽजाजीमरीचैस्तु संस्कृतैरविदाहिभिः ॥ १२ ॥
वृन्ताकबिल्वतैलानि कारवेल्लञ्च वर्जयेत् ।
स्त्रियं परिहरेद् दूरं कोपञ्चापि विवर्जयेत् ॥ १३ ॥

शुद्ध पारा एक तोला, स्वर्णभस्म एक तोला, मोतीभस्म दो तोला, शुद्ध गन्धक दो तोला, शुद्ध सुहागा एक तोला। पहले पारा गन्धक की कज्जली करे फिर अन्य वस्तु मिलाकर कांजी से पीस कर एक मूषा में रखे। सन्धि बन्द कर दे। एक हांडी में नमक नीचे ऊपर भरकर बीच में इस मूषा को रख दे

---

१ 'ततः' पा०। २ 'रसपादन्तु' पा०। ३ 'विशोषयेत्' पा०। ४ 'यन्त्रे' पा०।
५ अस्यानन्तरं 'स्वाङ्गशीतं समुद्धृत्य देयं गुञ्जाचतुष्टयम्' इत्यधिकः क्वचित्।
६ 'रोगराजनिकृन्तनः' पा०। अस्यानन्तरं च 'रसस्य भस्मना हेम भस्मीकृत्य प्रयोजयेत्।' इत्यधिकः भैषज्यरत्नावल्याम्।
७ 'पथ्यं सुलघुमांसेन प्रायशोऽस्य प्रयोजयेत्। दध्याजं गव्यतक्रं वा मांसमाजं प्रयोजयेत्'॥ पा०।
८ 'नातिक्षारैश्च हिङ्गुभिः' भै. र. पाठः। 'नातिक्षारैर्न हिङ्गुलैः' र. चि. पाठः।

और बारह घण्टे की आंच दे। स्वांगशीतल होने पर निकाल रखे। यह राजयक्ष्मा का नाशक मृगाङ्क रस है। इस की चार रत्ति की मात्रा मिरचों के चूर्ण और मधु के साथ अथवा दस पिप्पलियों के चूर्ण और मधु में मिलाकर खावे। पथ्य में लघु मांस (तीतर आदि के), घी में पकी हुई नाना प्रकार की भाजियें—जिनमें अधिक क्षार न हो, हींग न डाली गई हो, जो इलायची जीरा तथा काली मिरच आदि अविदाही द्रव्यों से संस्कृत हों देनी चाहियें। रोगी बेंगन, बिल, तेल, करेला न खावे। स्त्री से दूर रहे तथा क्रोध को त्याग देवे।

विशेषवचन—इसे आजकल १ रत्ती मात्रा में प्रयुक्त कराया जाता है। अनुपान में पिप्पली वा मरिच का चूर्ण दो से चार रत्ती की मात्रा में मिलाया जासकता है।

यक्ष्मा यदि बहुत वर्षों का हो, कास हो, ज्वर हो, नेत्र वा हाथ पैर आदि में जलन हो तो देना चाहिये। यदि साथ ही आतिसार हो तो भी इसे दिया जा सकता है। दमे में भी इससे लाभ होता है। यह यक्ष्मा के ज्वर को शीघ्र कम करता है।

तन्त्रान्तर में इस योग को बनाने के लिये एक निर्देश है और वह यह है कि इसमें जो स्वर्णभस्म डाली जाय वह पारदभस्म के योग से की हुई होनी चाहिये।

रसेन्द्रचिन्तामणि में इसे महामृगाङ्क नाम से कहा है।

योगरत्नाकर में दो पाठ मृगाङ्क रस के दिये हैं। जिनमें से एक रसरत्नप्रदीप से उद्धृत है और दूसरा वैद्यविलास से। वहां गन्धक पारद के समान ही लेने को कहा है। यहां पर भी गन्धक को पारद के समान लेने का अभिप्राय निकल सकता है। परन्तु व्यवहार प्रायः मुक्ता के समान लेकर ही है।

'रसेन तुल्यं कनकं तयोस्तु साम्येन युञ्ज्यान्नवमौक्तिकानि ।
रसप्रमाणो बलिरङ्घ्रिभागः क्षारश्च सर्वं तुषवारिणा तु ॥
सम्मर्द्य घस्रं तु विधाय गोलं दिनं पचेत्तं लवणेन पूर्णे ।
भाण्डे मृगाङ्कोऽयमतिप्रगल्भः क्षयाग्निमान्द्यग्रहणीगदेषु ॥
साज्योषणाभिर्मधुपिप्पलीभिर्वल्लोऽस्य देयो न ततोऽधिकस्तु ।
पथ्यं हितं शीतलमेव योज्यं त्याज्यं सदा पित्तकरं विदाहि ॥'

यहां पर क्षार भी पारद से चतुर्थांश है। रसेन्द्रचिन्तामणि भैषज्यरत्नावली आदि में भी टङ्कण को पारद से चतुर्थांश लेने को ही कहा है। व्यवहार भी उसी से है। केवल यहां या रसराजसुन्दर में ही पारद के तुल्य टङ्कण को लेने का पाठ है। यहां कहे गये क्षार से सामान्य नियम के अनुसार यवक्षार भी लिया जा सकता है जैसा कि वैद्यविलास के निम्न उद्धरण से स्पष्ट हो जायगा। परन्तु यक्ष्मा में कास श्वास स्वरभेद आदि लक्षणों के निश्चित होने पर अन्य क्षारों की अपेक्षा सामान्यतः टङ्कणक्षार ही अधिक प्रशस्त है। इसके देर तक प्रयोग से भी हानि नहीं होती। थोड़े दिन के लिये प्रयोग कराना हो तो यवक्षार से प्रस्तुत योग दे सकते हैं।

'रसबलितपनीयं योजयेत्तुल्यभागं
तदनु युगलभागं मौक्तिकानां शुभानाम्।
यवजचरणयुक्तं मर्दयेत्सर्वमेत—
द्दिनमपि तुषवारा गोलकं लध्वसत्रे।
विधाय मुद्रां निदधीत भाण्डे चुल्ल्यां समुद्रे लवणेन पूर्णे।
दिनं पचेच्चारु मृगाङ्कनामा क्षयाग्निमान्द्यग्रहणीविकारे॥
योज्यः सदा वह्निजसर्पिषा वा कृष्णामधुभ्यां सततं त्रिगुञ्जः।
वर्ज्यं सदा पित्तकरं हि वस्तु लोकेशवत्पथ्यविधिर्निरुक्तः॥'

शार्ङ्गधर में मृगाङ्करस से मिलता जुलता मृगाङ्कपोटली रस है।

'भूर्जवत्तनुपत्राणि हेम्नः सूक्ष्माणि कारयेत्।
तुल्यानि तानि सूतेन खल्वे क्षिप्त्वा विमर्दयेत्॥
काञ्चनाररसेनैव ज्वालामुख्या रसेन वा।
लाङ्गल्या वा रसैस्तावद्यावद्भवति पिष्टिका॥
ततो हेम्नश्चतुर्थांशं टङ्कणं तत्र निक्षिपेत्।
पिष्टमौक्तिकचूर्णं च हेमद्विगुणमावपेत्॥
तेषु सर्वसमं गन्धं क्षिप्त्वा चैकत्र मर्दयेत्।
तेषां कृत्वा ततो गोलं वासोभिः परिवेष्टयेत्॥
पश्चान्मृदा वेष्टयित्वा शोषयित्वा च धारयेत्।
शरावसम्पुटस्यान्तस्तत्र मुद्रां प्रदापयेत्॥

लवणापूरिते भाण्डे धारयेत्तं च सम्पुटम् ।
मुद्रां दत्त्वा शोषयित्वा बहुभिर्गोमयैः पुटेत् ॥
ततः शीते समाहृत्य गन्धं सूतसमं क्षिपेत् ।
घृष्ट्वा च पूर्ववत् खल्वे पुटेद् गजपुटेन च ॥
स्वाङ्गशीतं ततो नीत्वा गुञ्जायुग्मं प्रयोजयेत् ।
अष्टभिर्मरिचैर्युक्तं कृष्णात्रययुतोऽथवा ॥
विलोक्य देयो दोषादीनेकैका रसरक्तिका ।
सर्पिषा मधुना वापि दद्याद्दोषाद्यपेक्षया ॥
लोकनाथसमं पथ्यं कुर्यात्स्वस्थमनाः शुचिः ।
श्लेष्माणं ग्रहणीं कासं श्वासं क्षयमरोचकम् ।
मृगाङ्कोऽयं रसो हन्यात्कृशत्वं बलहीनताम् ॥'

एक तोला सोने के वर्कों को तुल्य शुद्ध पारद के साथ खरल में कचनार, ज्वालामुखी, कलिहारी; इनमें से किसी एक के रस से तबतक घोंटे जब तक कि उसकी पिष्टी बन जाय। इस पिष्टी को सवा चार तोले गन्धक के साथ मर्दन करके कज्जली कर लें। पश्चात् शुद्ध सुहागा चौथाई तोला और मोती की पिष्टी दो तोला डालकर पूर्वोक्त रस से घोटकर गोला बना लें। शुष्क होने पर (केले आदि का पत्ता लपेट कर) उस पर लीरें लपेट दें और मिट्टी लीप कर धूप में सुखा लें। इसे शरावसम्पुट में बन्द कर लवणयन्त्र में रखें और महापुट दें। शीतल होने पर औषध को बाहिर निकाल एक तोला गन्धक डालकर पूर्ववत् खरल में घोटें और गजपुट दें। इसे एक रत्ति मात्रा में मरिचचूर्ण और घी वा पिप्पलीचूर्ण और मधु के साथ देते हैं॥

रसरत्नाकर में मृगाङ्करस इसप्रकार है—

'रसभस्म स्वर्णभस्म निष्कं निष्कं प्रकल्पयेत् ।
शङ्खगन्धकमुक्तानां द्वौ द्वौ निष्कौ तु चूर्णयेत् ॥
मुक्ताभावे वराटी वा रसपादं च टङ्कणम् ।
वह्निकाथारनाले च मर्दयेत्प्रहरद्वयम् ॥
तद्गोलकं विशोष्याथ भाण्डे लवणपूरिते ।
पचेद्यामचतुष्कं च मृगाङ्कोऽयं महारसः ॥

रोगराजनिवृत्त्यर्थं चतुर्गुञ्जामितं घृतैः।
दातव्यं मरिचैः सार्धं पिप्पलीमधुनापि वा ॥'

रससिन्दूर १ निष्क, स्वर्णभस्म १ निष्क, शङ्खभस्म २ निष्क, शुद्ध गन्धक २ निष्क, मुक्ताभस्म (अभाव में कौड़ीभस्म) २ निष्क, सुहागा चौथाई निष्क; इन्हें एकत्र चित्रकक्काथ और कांजी से दो दो पहर घोट कर गोला बनावें और मूषा में डाल लवणयन्त्र में ४ प्रहर पकावें और इसकी चार रत्ति की मात्रा (आधुनिक एक वा दो रत्ती) को मरिचचूर्ण और घी वा पिप्पलीचूर्ण और मधु से यक्ष्मा में दें ॥ ८—१३ ॥

रत्नगर्भपोट्टलीरसः—

रसं वज्रं हेम तारं नागं लौहञ्च ताम्रकम्।
तुल्यांशं [2]मरिचं देयं मुक्ताविद्रुममाक्तिकम्[3] ॥ १४ ॥
[4]शङ्खं तुत्थञ्च तुल्यांशं सप्ताहं चित्रकद्रवैः।
मर्दयित्वा विचूर्ण्याथ तेन[5] पूर्य्या वराटिका ॥ १५ ॥
टङ्कणं रविदुग्धेन [6]मुखं लिप्त्वा निरोधयेत्।
मृद्भाण्डे [7]तां निरुद्ध्याथ सम्यग्गजपुटे पचेत् ॥ १६ ॥
आदाय चूर्णयेत् [8]सर्वं निर्गुण्ड्या सप्त भावयेत्।
आर्द्रकस्य रसैः सप्त [9]चित्रकस्यैकविंशतिः ॥ १७ ॥

---

१ 'गन्धं' र. र. पाठः। २ 'मारितं' भै. र., यो. र. पाठः।

३ अस्यानन्तरं 'राजावर्तं च वैक्रान्तं गोमेदं पुष्परागकम्' इत्यधिकः पाठो योगरत्नाकर उपलभ्यते। ४ 'शङ्खञ्च तुल्यतुल्यांशं' यो. र. पाठः। 'शङ्खञ्च पूर्ववद्भागं' र. र. पाठः। ५ 'तेनापूर्य वराटकान्' यो. र. पाठः।

६ 'पिष्ट्वा तन्मुखमन्धयेत्' पा०। 'पिष्ट्वा तासां मुखं लिपेत्' र. र. पाठः। पिष्ट्वा तन्मुद्रणं चरेत्' यो. र. पाठः।

७ 'ताः' पा०। 'तान् सुसंयन्त्र्य' यो. र. पाठः।

८ 'सम्यङ् निर्गुण्ड्याः सप्तभावनाः' पा०।

९ 'चित्रकस्य च विंशतिः' र.रा. सु. पाठः।

द्रवैर्भाव्यं ततः शोष्यं देयं गुञ्जाचतुष्टयम्।
क्षयरोगं निहन्त्याशु साध्यासाध्यं न संशयः ॥ १८ ॥
योजयेत् पिप्पलीक्षौद्रैः सघृतैर्मरिचैस्तथा।
महारोगाष्टके कासे श्वासे चैवातिसारके।
पोट्टलीरत्नगर्भोऽयं सर्वरोगकुलान्तकः ॥ १९ ॥

शुद्ध पारा, हीराभस्म, स्वर्णभस्म, चांदीभस्म, सीसाभस्म, लौहभस्म, तांबाभस्म, मिरचों का चूर्ण, मोतीभस्म, मूंगाभस्म, स्वर्णमाक्षिकभस्म, शंखभस्म, शुद्ध नीलाथोथा; प्रत्येक समभाग लें। इन्हें एकत्र मिलाकर चीते के क्वाथ से सात दिन मर्दन करे। फिर इसे चूर्ण कर कौड़ियों में भरें। सुहागे को आक के दूध से मर्दन करके उससे कौड़ियों के मुख को बन्द करदें। फिर इन कौड़ियों को एक मिट्टी के पात्र में डाल शराव से मुख को बन्द कर सन्धिबन्धन करके गजपुट में फूँक देवें। स्वांगशीतल होने पर निकाल कौड़ियों समेत सारे को चूर्ण कर सम्भालू के रस से सातवार, अदरक के रस से सातवार, और चीते के क्वाथ से इक्कीस भावना देवें। फिर सुखाकर चार रत्ति की मात्रा पिप्पलीचूर्ण और शहद से देवें अथवा मिरचों के चूर्ण तथा घी से देवें। इससे क्षयरोग साध्य हो या असाध्य नष्ट होता है। आठों महारोग, खांसी, श्वास, अतिसार; इन सब रोगों को रत्नगर्भपोट्टलीरस दूर करता है।

विशेषवचन—इस रस की आधुनिक मात्रा–१ रत्ती है।

इस योग में अनुक्त गन्धक भी एक भाग डालनी ही चाहिये। अथवा वैद्य शुद्ध पारा न लेकर रससिन्दूर लेते हैं। यदि शुद्ध पारा लें तो गन्धक भी डालनी होगी। गन्धक के योग से तुत्थ की भी भस्म हो जायगी।

---

१ 'शुष्कं' पा०

२ 'पिप्पलीदशकैः क्षौद्रैर्मरिचैकोनविंशतिः। सघृतैर्दापयेद्वाथ क्षयरोगनिवृत्तये' र. र. पाठः। 'क्षयरोगं निहन्त्याशु सत्यं शिव इवान्धकम्' यो. र. पाठः।

३ 'ज्वरे श्वासेऽतिसारके' पा०।

४ 'पोटली रत्नगर्भेयं सर्वरोगहरा मता' यो. र. पाठः।

५ 'योगवाहे नियोजयेत्' भै.र., र.र. पाठः।

योगरत्नाकर के पाठ में मरिच चूर्ण और तूतिया नहीं है परन्तु राजावर्त-(लाजवर्द)भस्म, वैक्रान्तभस्म, गोमेदभस्म, पुष्पराग(पुखराज)भस्म; प्रत्येक १ भाग अधिक हैं। रसरत्नाकर के पाठ में प्रकृतग्रन्थ के योग से तूतिया न होने की भिन्नता है और सीसाभस्म के स्थान पर विशुद्ध गन्धक का पाठ है। भैषज्यरत्नावली में केवल मरिचचूर्ण नहीं है। आठ महारोग निम्न श्लोकोक्त हैं—

'वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्तिताः ॥'

इस रस को यदि रोगी अत्यन्त निर्बल हो, यकृत् और प्लीहा अपना कार्य सुचारुरूपेण न करते हों तथा रक्तहीनता, दम फूलना, खांसी, पतला और बदबूदार दस्त आना आदि लक्षण होने पर यक्ष्मा के रोगी को दिया जाता है॥१४-१९॥

लोकेश्वरपोट्टलीरसः—

[1]रसस्य भस्मना हेम पादांशेन प्रकल्पयेत् ।
द्विगुणं गन्धकं दत्त्वा मर्दयेत् चित्रकाम्बुना ॥ २० ॥
पूर्य्या[2] वराटिका तेन टङ्कणेन निरुद्ध्य च ।
भाण्डे चूर्णप्रलिप्तेऽथ क्षिप्त्वा रुद्ध्वा[3] च मृण्मये ॥ २१ ॥
शोषयित्वा गजपुटे[4] पुटेत् तु चापराह्णिके ।
स्वाङ्गशीतं[5] समुद्धृत्य चूर्णयित्वा तु[6] विन्यसेत् ॥ २२ ॥
एष लोकेश्वरो नाम वीर्य्यपुष्टिविवर्द्धनः ।

---

१ 'भस्मसूताच्चतुर्थांशं मृतं स्वर्णं प्रदापयेत्' र. रा. सु. पाठः ।

२ 'वराटकांश्च सम्पूर्य' पा० । 'चराचरास्ये सम्पूर्य' र. र. स. पाठः ।

३ 'रुन्धीत' पा० । रुन्धीत मृत्स्नया' र. र. स. पाठः ।

४ 'पुटेद्गर्त्तेऽरत्निमात्रेऽपराह्णिके' र. र. स., यो. र. पाठः । 'पुटेद्गर्त्तेऽरत्निमात्रे पराह्णिके' र. चि. पाठः । 'गजपुटे पुटयेत्तु पराह्णके' र. रा. सु. पाठः ।

५ 'स्वाङ्गशीतलमुद्धृत्य' पा० । ६ 'अथ' पा० ।

गुञ्जाचतुष्टयं चास्य पिप्पलीमधुसंयुतम् ॥ २३ ॥
मरिचैर्घृतयुक्तैश्च भक्षयेद्दिवसत्रयम् ।
अङ्गकार्श्येऽग्निमान्द्ये च कासे पित्ते क्षयेऽपि च ॥ २४ ॥
लवणं वर्जयेत् तत्र साज्यं दधि च योजयेत् ।
एकविंशद्दिनं यावत् सघृतं मरिचं पिबेत् ।
पथ्यं मृगाङ्कवद्देयं शयीतोत्तानपादतः ॥ २५ ॥
ये शुष्का विषमाशनैः क्षयरुजा व्याप्ताश्च येऽष्ठीलया
पाण्डुत्वेन हताः कुवैद्यविधिना ये चाधिना दुर्भगाः ।
ये तप्ता विविधैर्ज्वरैः श्रमभदोन्मादैः प्रमादं गताः
ते सर्वे विगतामया हतरुजः स्युः पोट्टलीसेवनात् ॥ २६ ॥

रससिन्दूर एक तोला (९६ रत्ती), स्वर्ण भस्म तीन माशे (२४ रत्ती), शुद्ध गन्धक दो तोला। पहिले रससिन्दूर और गन्धक को अच्छीप्रकार पीसे फिर स्वर्णभस्म मिला चीते के क्वाथ से घोटे। शुष्क होने पर पीली कौड़ियों में भर दे और सुहागे से कौड़ियों का मुंह बन्द करदे। एक मिट्टी की हांडी पर

---

१ 'साज्यं मरिचैश्च समन्वितम्' र. र. स. पाठः । २ 'खादेत्परमया भक्त्या लोकेशे सर्वदर्शिनि' र. र. स. पाठः । 'भक्षयेत्परया भक्त्या लोकेशः सर्वदाशनः' यो. र. पाठः । 'भक्षयेत्पयसा भक्त्या लोकेशः सर्वदर्शनः' र. चि. पाठः ।

३ 'कासे पित्ते रसस्त्वयम्' पा० । 'रसोऽयं कासहिक्कयोः' र. र. स. पाठः ।

४ अस्यानन्तरं रसरत्नसमुच्चयादौ 'मरिचैर्घृतसंयुक्तैः प्रदातव्यो दिनत्रयम्' इति पठितम् ।

५ 'सदधि भोजनम्' पा० ।

६ 'विषमानलैः' पा० । ७ 'ये कुष्ठिनः' यो. र. पाठः ।

८ 'वैद्यविधिना हीनाश्च ये दुर्भगाः' पा० । ९ 'शोषिणः' पा० ।

१० 'भ्रममदोन्मादैः' पा०

११ 'विगताभया हि परया स्युः पोटलीसेवया' यो. र. पाठः ।

जिसके अन्दर चूना फिरा हो कपड़ामिट्टी कर ले। सूख जाने पर हांडी में इन कौड़ियों को रख मुंह बन्द कर सन्धिबन्धन करे और सुखा ले। इसे सायंकाल गजपुट देवे। अगले दिन स्वांगशीतल होने पर निकाल कर कौड़ियों समेत चूर्ण कर शीशी में रख ले। यह लोकेश्वर रस वीर्यवर्धक और पुष्टिकारक है। इसको चार रत्ति मात्रा में लेकर पिप्पली चूर्ण और शहद अथवा काली मिरच का चूर्ण और घी मिलाकर देह की कृशता, अग्निमान्द्य, खांसी, पित्तरोग तथा क्षयरोग में तीन दिन सेवन करावें। इसके सेवनकाल में रोगी नमक न खावे। दही में घी डालकर खिलावें। रोगी इक्कीस दिन तक घी में काली मिरचों का चूर्ण मिलाकर पीवे। पथ्य मृगाङ्क के समान देवें। रोगी सीधा चित लेटा रहे। जो रोगी विषम भोजनों से सूख गये है, जो क्षयरोग से आक्रान्त हैं,जो अष्ठीला वा पाण्डुरोग से मारे जा रहे हैं, जो कुवैद्य के इलाज से वा चिन्ता शोक आदि मानसिक रोगों से कान्तिहीन हो गये हैं, जो विविध ज्वरों वा रोगों से तप रहे हैं तथा जो श्रम मद और उन्माद से प्रमाद को प्राप्त हो गये हैं; वे सभी इस लोकेश्वरपोटली रस के सेवन से रोगमुक्त और पीड़ारहित हो जाते हैं।

विशेषवचन—आधुनिक मात्रा—आधी रत्ती। यहां पर जो गजपुट का विधान है यह अल्प द्रव्य के लिये ठीक नहीं है। उसके लिये तो तन्त्रान्तरों में कहे अनुसार अरत्निमात्र गढे में पुट देना ही ठीक है। रसरत्नसमुच्चय में यह रस लोकनाथ नाम से है। वहां इसके साथ ही इसके सेवनकाल में यक्ष्मा में होने वाले उपद्रवों की चिकित्सा भी कही है। बताया है कि यदि कै हो तो गिलोय के रस में मधु मिलाकर पिलाना चाहिये। खाने को बैंगन का भरता दें। अथवा घी में धनिये को भूनकर चूर्ण करलें, इसे छोटी इलायचीचूर्ण और मरिचचूर्ण को मिला शरबत में डाल पीने को दें। शीतल जल से स्नान करावें वा सिर पर शीतल जल की धारा डालें।

यदि कफविकार हो तो कफनाश के लिये केले को घी में भूनकर मरिचचूर्ण का अवधूलन कर खाने को दें। अथवा अदरक को मधु वा गुड़ के साथ दें।

अरुचि होने पर तुषरहित धनिये को हलका सा भूनकर चूर्ण कर लें और कुछ घी खांड मिला रोगी को सेवनार्थ दें।

यदि कृमिजन्य उपद्रव भी हों तो अजवाइन और वायविडंग के चूर्ण को छाछ के साथ पिलावें। अथवा एरण्डमूल और मोथा; इनका क्वाथ दें।

विरेचन होता हो तो दुग्धिका (दूधी) को अग्निपर संस्कृत करके (हलका भूनकर) दे। अथवा भांग के पत्तों के चूर्ण को थोड़ा भूनकर उचित मात्रा में मधु के साथ रात को सोते समय दें।

यदि अंगों में वेदना हो—अंग टूटते हों तो घी की मालिश करके रोगी को गरम जल से स्नान करा दें॥ २०—२६॥

कनकसुन्दरो रसः—

रसस्य तुर्यभागेण हेमभस्म प्रयोजयेत्।
मनःशिला गन्धकश्च तुत्थं माक्षिकतालकम्॥ २७॥
विषं टङ्कणकं सर्वं रसतुल्यं प्रदापयेत्।
मर्दयेत् सर्वमेकत्र खल्लपात्रे च निर्मले॥ २८॥
जयन्तीभृङ्गराजोत्थैः पाठाया वासकस्य च।
अगस्तिलाङ्गलाग्नीनां स्वरसैश्च पृथक् पृथक्॥ २९॥
भावयित्वा विशोष्याथ पुनश्चार्द्रकवारिणा।
सप्तधा भावयित्वा च रसः कनकसुन्दरः॥ ३०॥
गुञ्जाद्वयं त्रयं वाऽस्य राजयक्ष्मप्रशान्तये।
मधुना पिप्पलीभिर्वा मरिचैर्वा घृतान्वितम्॥ ३१॥
सन्निपाते प्रदातव्यमार्द्रकस्य रसेन वै।
जयपालरजोभिर्वा गुल्मिने शूलरोगिणे॥ ३२॥
अम्लवर्ज्जं चरेत् पथ्यं बल्यं हृद्यं रसायनम्।
वर्ज्जयेल्लवणं हिङ्गु तक्रं दधि विदाहि यत्॥ ३३॥

शुद्ध पारा एक तोला (९६ रत्ती), स्वर्णभस्म ३ माशा (२४ रत्ती), शुद्ध मनसिल, शुद्ध गन्धक, शुद्ध नीलाथोथा (शोधनकरण में प्रथमविधि से

शुद्ध तथा मृत), स्वर्णमाक्षिकभस्म, शुद्ध हड़ताल, शुद्ध विष, शुद्ध सुहागा; प्रत्येक द्रव्य एक २ तोला लें। पहले पारा गन्धक की कज्जली करें। फिर अन्य द्रव्य मिलाकर पीसें और जयन्ती, भांगरा, पाठा, बांसा (अडूसा), अगस्त्य (अगस्तिया), लाङ्गली या कलिहारी, चीता; इन सब के रस से पृथक् २ भावना (तन्त्रान्तर के अनुसार एक २ दिन) देकर सुखाकर फिर अदरक के रस से सातवार भावना दें और सुखा लें। यह कनकसुन्दर रस कहाता है। इस रस की दो या तीन रत्ति की मात्रा पिप्पलीचूर्ण और शहद से या मरिचचूर्ण और घी से दें तो राजयक्ष्मा शान्त होता है। इसको सन्निपात ज्वर में अदरक के रस से देना चाहिये। गुल्म तथा शूलरोग में इसमें जमालगोटे का चूर्ण मिलाकर देवें। इसके प्रयोग के समय पथ्य ऐसा खावें जो बलदायक, हृदय को सुख देने वाला तथा रसायन हो। खटाई, नमक, हींग, छाछ, दही तथा विदाही पदार्थ न खावें॥

विशेषवचन—आधुनिक मात्रा—१/४ रत्ती से १/२ रत्ती तक।

गुल्म वा शूल में शुद्ध जयपाल की मात्रा १/८ से १/४ रत्ती तक मिलायी जाती है। इसे यक्ष्मा की प्रथमावस्था में प्रयोग करना चाहिये। रसरत्नसमुच्चय में भी कनकसुन्दर रस है—

'रसस्य तुल्यभागेन हेमभस्म प्रकल्पयेत्।
तालकं गन्धकं तुत्थं माक्षिकं रसकं शिलाम्॥
रससाम्येन युञ्जीत, तुत्थं भस्मीकृतं न्यसेत्।
किञ्चिट्टङ्कणकं दत्त्वा मार्जारस्य विशा युतम्।
प्रथमं पुटयेद्दध्ना द्वितीयं मधुना सह॥
वह्नौ भस्मीकृतं चेत्थं मयूराख्यकतुत्थकम्।
तालकं शोधयेदग्रे कूष्माण्डक्षारपाचनात्॥
तैले पचेत्ततः सम्यक् चूर्णे वा परिशोधयेत्।
गन्धकं शोधयेद् दुग्धे रसकं नरवारिणा॥
माक्षिकं सिन्धुसंयुक्तं बीजपूररसे पचेत्।
जयन्तीद्रवसम्पिष्टां शिलां सुपाचितां न्यसेत्॥
एकीकृत्य ततः सर्वमर्कक्षीरेण मर्दयेत्।

जयन्तीभृङ्गराजाभ्यां वासापाठाकृशानुभिः ।
अगस्तिलाङ्गलीभ्यां च प्रत्येकं दिवसं शनैः ।
ततस्तु गोलकं बद्ध्वा पचेत्पूर्ववदादृतः ॥
चूर्णयित्वा ततः सम्यक् भावयेदार्द्रकाम्बुना ।
सप्तधा व्योषनिर्यासै रसः कनकसुन्दरः ॥
गुञ्जाद्वयं त्रयं वास्य राजयक्ष्मापनुत्तये ।
मधुना पिप्पलीभिश्च मरिचैर्वा घृतान्वितैः ॥
लेहयेद्रोगिणं वैद्यो बलावस्थाविशेषवित् ।
जयपालरजोभिर्वा शुण्ठ्या गव्यघृताक्तया ॥
ददीत शूलिने प्राज्ञो गुल्मिने च विशेषतः ।
कादिवर्जं चरेत्पथ्यं हृद्यं बल्यं च पूर्ववत् ॥
सन्निपाते ददीतैनमार्द्रकद्रवसंयुतम् ॥'

इसमें स्वर्णभस्म भी पारद के तुल्य ही है। टङ्कण और विष यहां नहीं। रसक (खर्पर) है। सब द्रव्यों को एकत्र मिलाकर आक (मदार) के दूध से मर्दन करना विशेष है। इसके पश्चात् यहां गोलक बनाकर पाक (मृगाङ्कवत्) का विधान विशेष है। तदनन्तर पूर्ववत् अदरक के रस की सात भावना हैं। यहां अन्त में त्रिकटु क्वाथ की भी सात भावनायें देने को अधिक कहा है। यह भी यहां बताया है कि योग में तुत्थ की भस्म डालनी चाहिये।

रसरत्नाकर में जो कनकसुन्दर है उसमें स्वर्णभस्म तो पारद से चतुर्थांश

---

१ रसः कनकभागिकः कनकमाक्षिकस्तालकः शिलारसकगन्धकाः रससमाः सतुत्था इमे। विमर्द्य पयसा रवेः सकलमेतदस्योपरि द्रवैः प्रतिदिनं पृथक् तदिति भावयेद् बुद्धिमान् ॥ जयामुनिकलिक्रियादहनभृङ्ग्यासोद्भवैर्विभाव्य च रसैस्ततः सुदृढगोलकं स्वेदयेत्। मृगाङ्कवदथार्द्रकद्रवभरेण तं सप्तधा विमर्द्य च कटुत्रयाम्बुभिरयं क्षयस्यान्तकृत् ॥ रसः कनकसुन्दरो भवति सन्निपातेऽप्ययं सदार्द्रकरसैस्तथा पवनगुल्मशूलप्रणुत्। सविश्वघृतयोजितः सकलमत्र पथ्यं हितं मृगाङ्कवदथापरं किमपि नैव योज्यं क्वचित् ॥ इति योगरत्नाकरे योगतत्त्वादुद्धृतः पाठः।

रसरत्नसमुच्चय के योग से इतनी ही भिन्नता है कि यहां पाठा के रस से मर्दन नहीं।

ही है परन्तु विष वहां भी नहीं, खर्पर है। टङ्कण (सुहागा) पारे से चतुर्थांश है। मदार के दूध से मर्दन का विधान भी है। पाक करने का आदेश नहीं।

'रसभस्म चतुर्थांशं हेमभस्म प्रकल्पयेत्।
तालकं रसकं तुत्थं माक्षिकं गन्धकं शिला ॥
रसमानानि युञ्जीत सूतपादं च टङ्कणम्।
दिनैकैकं क्रमेणैव तत्सर्वं मर्दयेद् दृढम् ॥
अर्कक्षीरं जयन्ती च भृङ्गो वासा च लाङ्गली।
अगस्तिचित्रकं पाठा मर्द्यमेषां द्रवैः पृथक्।
द्विगुञ्जं भक्षयेन्नित्यमनुपानं मृगाङ्कवत्।
क्षयं हन्ति महातीव्रं रसः कनकसुन्दरः ॥' २७—३३ ॥

हेमगर्भपोट्टली—

रसभस्म त्रयो भागा भागैकं हेमभस्मकम्।
मृतताम्रस्य भागैकं भागैकं गन्धकस्य च ॥ ३४ ॥
मर्दयेच्चित्रकद्रावैर्द्वियामान्ते समुद्धरेत्।
पूर्य्या वराटिका तेन टङ्कणेन विलेपयेत् ॥ ३५ ॥
वराटीं पूरयेद्भाण्डे रुद्ध्वा गजपुटे पचेत्।
विचूर्णयेत् स्वाङ्गशीते पोट्टली हेमगर्भिका।
मृगाङ्कवच्चतुर्गुञ्जा-भक्षणाद्राजयक्ष्मनुत् ॥ ३६ ॥

रससिन्दूर तीन तोला, स्वर्णभस्म एक तोला, ताम्रभस्म एक तोला, शुद्ध गन्धक एक तोला; इन्हें मिला मर्दन कर चीते के क्वाथ से दो पहरों तक घोटे। शुष्क होने पर कौड़ियों में इसे भरे और मुख को सुहागे से बन्द कर दे। उन कौड़ियों को एक हांडी में रख कर शराव से मुख बन्द कर दे और सन्धिबन्धन करके गजपुट में फूंक देवे। स्वांगशीतल होने पर कौड़ियों सहित चूर्ण करले। इस हेमगर्भपोट्टली को मृगाङ्क के समान चार रत्ति भर देने से राजयक्ष्मा रोग दूर होता है।

१ 'तालैकं' पा०।

विशेषवचन—इसकी आधुनिक मात्रा एक रत्ति की है ॥ ३४—३६ ॥

सर्वाङ्गसुन्दरो रसः—

गन्धो रसश्च तुल्यांशं[1] द्वौ भागौ टङ्कणस्य च ।
मौक्तिकं विद्रुमं शङ्खभस्म[2] देयं समांशिकम् ॥ ३७ ॥
हेमभस्मार्द्धभागश्च सर्वं खल्ले विमर्दयेत् ।
निम्बुद्रवेण[3] सम्पिष्य पिण्डिकां कारयेत् ततः[4] ॥ ३८ ॥
पश्चाद् गजपुटं दत्त्वा[5] सुशीतश्च समुद्धरेत् ।
हेमभस्मसमं तीक्ष्णं तीक्ष्णार्द्धं दरदं मतम् ॥ ३९ ॥
एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत् ।
ततः पूजां प्रकुर्वीत रसस्य दिवसे शुभे ॥ ४० ॥
सर्वाङ्गसुन्दरो ह्येष राजयक्ष्मनिकृन्तनः[6] ।
वातपित्तज्वरे घोरे सन्निपाते सुदारुणे ॥ ४१ ॥
अर्शःसु ग्रहणीदोषे मेहे गुल्मे भगन्दरे ।
निहन्ति वातजान् रोगान् श्लैष्मिकांश्च विशेषतः ॥ ४२ ॥
पिप्पलीमधुसंयुक्तं[7] घृतयुक्तमथापि वा ।
भक्षयेत् पर्णखण्डेन सितया चार्द्रकेण वा ॥ ४३ ॥

शुद्ध गन्धक एक तोला (९६ रत्ती), शुद्ध पारा एक तोला, दोनों की कज्जली करे। फिर शुद्ध सुहागा दो तोला, मोतीभस्म एक तोला, मूंगाभस्म एक तोला, शंखभस्म एक तोला, स्वर्णभस्म आधा तोला (४८ रत्ती); सब द्रव्यों को मिलाकर खरल में पीसकर नीबू के रस से (अन्य पुस्तक में नीम के रस से

---

१ 'रसगन्धकतुल्यांशौ' र.र. पाठः । २ 'शङ्खं मारणीयाः प्रयत्नतः' र.र. पाठः ।
३ 'निम्बुद्रवस्य योगेन' पा० । ४ 'भिषक्' पा० ।
५ 'दद्याच्छीतलञ्च' पा० । ६ रोगराजनिकृन्तनः' र. र. पाठः ।
७ 'पिप्पलीचूर्णसंयुक्तं घृतयुक्तमथापि च' पा० ।

घोटना लिखा है, वह ठीक भी है) घोट कर पिण्डी सी बनाकर शुष्क होने पर सम्पुट में रखकर गजपुट में फूँक देवे। फिर स्वांगशीतल होने पर उसको निकाल कर पीस लें। और तीक्ष्णलौह की भस्म आधा तोला और शुद्ध हिंगुल तीन माषा (२४ रत्ती) मिलाकर सूक्ष्म चूर्ण कर लेवे। फिर शुभ दिन में इस रस की पूजा करें। यह सर्वाङ्गसुन्दर रस राजयक्ष्मा रोग को नाश करता है। वातपित्तज ज्वर, घोर सन्निपात, बवासीर, ग्रहणीदोष, प्रमेह, गुल्म, भगन्दर, वातजरोग, विशेषतः श्लैष्मिकरोग; इन सबको दूर करता है। पिप्पलीचूर्ण और मधु वा घी के साथ, पान के पत्ते में, मिश्री से या अदरक के रस के साथ इसे खावें।

विशेषवचन—यहां पर भी गजपुट के स्थान पर लघुपुट देना ही उत्तम है। इस रस की आधुनिक मात्रा—२ रत्ती है।

यक्ष्मा में जब कफ का निःसरण कष्ट से हो, कफ पूययुक्त हो, मृदुज्वर हो, पार्श्वशूल हो तो इसका प्रयोग कराया जाता है। यह बहु परीक्षित औषध है। यदि रोगी का मल पतला हो वा दस्त आते हों तो इसे न दें।

रसरत्नाकर में इस रस को गिलोय के सत के साथ प्रमेह में भी उत्तम माना है। वहां उक्त पाठ के पश्चात्—

'गुडूचीसत्त्वसंयुक्तं प्रमेहेऽपि विशेषतः।
रसरत्नाकरे प्रोक्तः सिद्धयोगे रसोत्तमः॥
राजिकातैलहिङ्ग्वम्ललवणाढ्यं च वर्जयेत्॥'

इसप्रकार कहा है। राई, तेल, हींग, खटाई (अचार आदि भी) तथा अधिक नमक त्याज्य बताये हैं॥ ३७—४३॥

लोकेश्वरो रसः—

पलं कपर्दचूर्णस्य पलं पारदगन्धयोः।
माषं[1]ञ्च टङ्कणस्यैव जम्बीराद्भिर्विमर्दयेत्।
पुटेत् लोकेश्वरो नाम्ना लोकनाथो[2]रसोत्तमः॥ ४४॥

---

१ 'माषष्टङ्कणकस्यैकः' पा०। 'कर्षञ्च टङ्कणस्यैव' पा०।
२ 'लोकनाथोऽयमुत्तमः' पा०।

ऋते कुष्ठं रक्तपित्तमन्यान् रोगान् बलाज्जयेत् ।
पुष्टिवीर्य्यप्रसादौजः—कान्तिलावण्यदः परः ॥ ४५ ॥
कोऽस्ति लोकेश्वरादन्यो नृणां शम्भुमुखोद्गतात् ।
पथ्यं शाल्योदनं सर्पिर्दधि शाकं सहिङ्गुकम् ॥ ४६ ॥

नित्यं यामद्वयादूर्ध्वं कार्य्यं वारत्रयं दिवा ।
त्र्यहाद्वान्तेऽरुचौ वापि लग्नः सूतो न चेत् पुनः ॥ ४७ ॥
अष्टमेऽह्नि प्रदातव्यः पूर्ववत् कार्य्यसिद्धये ।
प्रथमे सप्तके[1] देया लावशूरणमुद्गकाः ॥ ४८ ॥
द्वितीये माषगोधूमौ भक्ष्यौ पूर्वोदितश्च यत् ।
देयानि मत्स्यमांसानि तृतीये मर्दनादिकम् ॥ ४९ ॥
तैलबिल्वारनालानि कोपस्त्रीस्वप्नजागरान् ।
त्यजेत् कादीनि द्रव्याणि हृद्यं स्वादु च शीलयेत् ॥ ५० ॥
वायौ सेव्यं पयः कोष्णं पित्ते तु सासितं हितम् ।
अत्यग्नौ चोरबीजानि तिलेक्षुकदलीफलम् ॥ ५१ ॥
खर्जूरमांसमृद्वीका—सितादि सकलं भजेत् ।
वीर्य्यच्युतौ नारिकेलजलं तालफलानि च ॥ ५२ ॥
आनाहारुचिमूर्च्छार्त्तिधूमोद्गारविसूचिकाः ।
एतेषु लघु शाल्यन्नं केवलं सघृतं हितम् ॥ ५३ ॥
अतिवान्तौ पिबेच्छिन्नारसं क्षौद्रेण संयुतम् ।
सक्षौद्रं वासकं रक्तपित्ते, रुचिविपर्य्यये ॥ ५४ ॥
भृष्टधान्यं सितायुक्तमथवा क्षौद्रसंयुतम् ।

---

[1] 'सप्तमे' इति प्रचलितः पाठः ।

यवान्नं मधुसंयुक्तं पिबेद्वा माहिषं दधि ॥ ५५ ॥
घृतान्नं भक्षयेन्नित्यं सुखोष्णेन च वारिणा ।
छिन्नाऽम्बुसहितं देयं दाहेऽजीर्णे सुधाजलम् ॥ ५६ ॥
आर्द्रकं सर्षपं रम्भाफलं भृङ्गं कफोल्वणे ।
अन्येऽप्युपद्रवा ये स्युस्तत्तच्छान्त्यै यथौषधम् ॥ ५७ ॥
द्वात्रिंशद्दिवसे कार्य्यं स्नानमामलकैस्तिलैः ।
युक्तं सेव्यं बले जाते शनैरग्निबलादनु ॥ ५८ ॥

कौड़ीभस्म एक पल, शुद्ध पारा आधा पल, शुद्ध गन्धक आधा पल, शुद्ध सुहागा एक माषा लें । पहले पारा गन्धक की कज्जली करें । फिर अन्य द्रव्य मिलाकर जम्बीरी के रस से घोटकर सम्पुट में बन्द कर पुट दें । यह उत्तम लोकनाथ रस लोकेश्वर कहाता है । कुष्ठ और रक्तपित्त को छोड़ कर अन्य रोगों को बलपूर्वक जीतता है । पुष्टि, वीर्य, ओज, प्रसाद, कान्ति तथा लावण्य देता है । शम्भु मुख से कहे गये इस लोकेश्वर रस से बढ़कर और कौन उत्तम रस है । इसके सेवन करने वाले को पथ्य में शाली चावल, घी, दही तथा हींग युक्त शाक खाना चाहिये । नित्य छः छः घण्टे के बाद और दिन में तीन बार पथ्य देना चाहिये । यदि तीन दिन देने से रोगी को वमन हो जाय या अरुचि हो और यह रस ठीक अनुकूल न बैठे—लाभ न करे तो बीच में बन्द करके आठवें दिन कार्य्यसिद्धि के लिये पूर्ववत् पुनः देना चाहिये । पहले सप्ताह में लवा का मांस ज़मींकन्द और मूंग का पथ्य दिया जाता है । दूसरे सप्ताह में उड़द गेहूं तथा पूर्वोक्त पथ्य दें । तीसरे सप्ताह में मछली और मांस दें तथा तैल आदि के मर्दन की व्यवस्था करें । तेल, बिल, कांजी, क्रोध, स्त्रीसंग, दिन में सोना, रात को जागना, करेला ककड़ी आदि ककाराष्टक द्रव्य; इन्हें छोड़ देवे । जो हृदय के लिये हितकारी तथा स्वादु-मधुर द्रव्य हैं उन्हें सेवन करें । वायु के दोष में गरम दूध पीवे, पित्त के दोष में मिश्री सहित शीतल किया हुआ दूध पीवे । अत्यग्नि रोग अर्थात् भस्मक रोग में चोर के बीज

३ 'भङ्गं' पा० ।

(अपामार्ग के बीज), तिल, ऊख, केले का फल, खजूर, मांस, द्राक्षा, मिश्री आदि खावे । वीर्यपात हो तो नारियल का जल तथा ताड़ का फल खावे। आनाह, अरुचि, मूर्छा, धुएं के से डकार आना, विसूचिका; इन सब उपद्रवों में शाली चावलों का लघु भात घृत सहित दें। अति वमन होता हो तो गिलोय के स्वरस में शहद मिलाकर पिलावें। रक्तपित्त में बांसा के रस में शहद मिलाकर दें । अरुचि हो तो भुने हुए धनिये को मिश्री या शहद मिलाकर देना चाहिये या जौ के अन्न में शहद मिलाकर खावे अथवा भैंस का दही पीवे । घी मिला हुआ अन्न (भात) नित्य खावे और गरम जल पीवे । दाह रोग में गिलोय के रस के साथ दें और अजीर्ण में चूने के जल के साथ देवें । कफ की प्रधानता में अदरक, सरसों, केला का फल, दारचीनी देवें। अन्य भी जो उपद्रव हों उनमें उस २ की शान्ति के लिये उचित औषध देवें। बत्तीसवें दिन पर आमलों और तिल के उबटने के साथ स्नान करें। बल हो जाने पर अग्निबल के अनुसार शनैः जो उचित पथ्य हो वह करता रहे ।

विशेषवचन—आधुनिक मात्रा—४ रत्ती । इस औषध का प्रयोग काल ३२ दिन का बताया है और इस औषध के सेवन काल का साप्ताहिक पथ्य भी ऊपर कह दिया है । इससे मिलता जुलता लोकनाथ रस अतिसाराधिकार में कहा जाचुका है वा लघुलोकेश्वर रस मूत्राघाताधिकार में कहा जायगा ।

कई यहां 'भृष्टधान्य' से धान की खील लेते हैं । परन्तु वह वान्ति में उत्तम होती है । अरुचि में उतना लाभ नहीं करती। ईषद्भृष्ट धनियां ही अरुचि में अच्छा रहता है । पूर्व कहे गये लोकेश्वरपोटली रस के विशेषवचन में रसरत्नसमुच्चय से उद्धृत लोकनाथ रस के उपद्रवशान्ति-प्रकरण में अरुचिनाशार्थ धनिये का प्रयोग कहा जा चुका है। पाठ इस प्रकार है—

'भृष्ट्वा कुस्तुम्बुरूनीषन्निस्तुषांश्चूर्णयेत्ततः ।
शर्कराघृतसंमिश्रान्दद्यादरुचिशान्तये ॥' ४४—२८ ॥

स्वल्पमृगाङ्कः—

रसभस्म हेमभस्म तुल्यं गुञ्जाद्वयं भजेत् ।

दोषं बुद्ध्वाऽनुपानेन मृगाङ्कोऽयं क्षयापहः ॥ ५८ ॥

रससिन्दूर और स्वर्णभस्म; दोनों को एक २ रत्ति लेकर मिलाकर दो रत्ति की मात्रा दोषानुसार उचित अनुपान से दे तो क्षयरोग का नाश होता है। इसका नाम स्वल्पमृगाङ्क रस है।

विशेषवचन—आधुनिक मात्रा–आधी रत्ती।

इसे क्षयरोग में यकृत् के काम न करने पर और वात प्रबलता होने पर दिया जाता है। अनुपान-पिप्पलीचूर्ण २ रत्ती और मधु है। यह कास को भी कम करता है। काली खांसी (Whooping Cough) जिस में वात की प्रधानता रहती है। इसे कण्टकारी बीज के चूर्ण के साथ देते हैं।

रसेन्द्रचिन्तामणि में क्षय में बकरी के दूध का अनुपान बताया है ॥ ५८ ॥

काञ्चनाभ्र रसः—

काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम्।
विद्रुमञ्चाभया तारं कस्तूरी च मनःशिला ॥ ६० ॥
प्रत्येकं बिन्दुमात्रन्तु सर्वं सम्मर्द्य यत्नतः।
वारिणा वटिका कार्य्या द्विगुञ्जाफलमानतः ॥ ६१ ॥
अनुपानं प्रयोक्तव्यं यथादोषानुसारतः।
क्षयं हन्ति तथा कासं श्लेष्मापित्तसमुद्भवम्[3] ॥ ६२ ॥
प्रमेहं विविधं[4]श्चैव दोषत्रयसमुत्थितम्।
कफ[5]जान् वातजान् रोगान् नाशयेत् सद्य एव हि ॥ ६३ ॥
बलवृद्धिं वीर्य्यवृद्धिं लिङ्गदार्ढ्यं करोति च[6]।

१ 'पूर्ववदनुपानेन' पा०।
२ 'अस्यानन्तरं नानारोगप्रशमनं सर्वोपद्रवसंयुतम्' इत्यधिकः अन्यत्र।
३ 'श्लेष्मपित्तहरं तथा' र. र. पाठः।
४ प्रमेहान् विंशतिश्चैव दोषत्रयसमुत्थितान्' पा०। ५ 'अशीतिं' पा०।
६ अस्यानन्तरं 'रसोऽयं सुश्रुतप्रोक्तो वाजीकरण उत्तमः' इत्यधिकः रसरत्नाकरे।

श्रीकरः पुष्टिजननः नानारोगनिसूदनः।
गहनानन्दनाथोक्तो रसोऽयं काञ्चनाभ्रकः॥ ६४॥

स्वर्णभस्म, रससिन्दूर, मोतीभस्म, लौहभस्म, अभ्रकभस्म, मूंगाभस्म, हरड़-चूर्ण, चांदीभस्म, कस्तूरी, शुद्ध मनसिल; प्रत्येक द्रव्य एक २ कर्ष लें। पीसकर जल से दो रत्ति की गोली बनालें। इस गोली को दोषानुसार भिन्न२ अनुपानों से देने पर क्षयरोग, पित्त एवं श्लेष्मा से उत्पन्न हुई खांसी तथा त्रिदोषज विविध प्रमेह नष्ट होते हैं। कफज तथा वातज सब रोगों को शीघ्र नाश करता है, बल बढ़ाता है, वीर्य बढ़ाता है, लिंग को दृढ़ करता है। यह सौन्दर्यवर्द्धक, पुष्टिकारक और नानारोगनाशक है। यह गहनानन्द का कहा काञ्चनाभ्र रस है।

विशेषवचन—आधुनिक मात्रा—आधी रत्ती। यदि यक्ष्मा में ज्वर प्रबल हो वा मध्य हो, श्लेष्मा बहुत अधिक निकलती हो, हृदय निर्बल हो वा धातुक्षयज यक्ष्मा हो तो इसका प्रयोग किया जाता है॥ ६०—६४॥

बृहत्काञ्चनाभ्ररसः—

काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम्।
विद्रुमं मृतवैक्रान्तं तारं ताम्रञ्च वङ्गकम्॥ ६५॥
कस्तूरिका लवङ्गञ्च जातीकोषैलवालुकम्।
प्रत्येकं बिन्दुमात्रञ्च सर्वं मर्द्यं प्रयत्नतः॥ ६६॥
कन्यानीरेण सम्मर्द्य केशराजरसेन च।
अजाक्षीरेण सम्भाव्यं प्रत्येकं दिवसत्रयम्॥ ६७॥
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक्।
अनुपानं प्रयोक्तव्यं यथा दोषानुसारतः[3]॥ ६८॥

१ 'काञ्चनस्य समा कान्तिर्मदनस्य समं वपुः। भक्ष्यस्तु प्रातरुत्थाय' भै. र., र. र. पाठः। २ 'रसं तु काञ्चनाभ्रकम्' र. र. पाठः।

३ अस्यानन्तरं 'नानारोगप्रशमनं सर्वोपद्रवसंयुतम्' अधिकः पाठोऽन्यत्र।

क्षयं हन्ति तथा कासं यक्ष्माणं श्वासमेव च ।
प्रमेहान् विंशतिश्चैव दोषत्रयसमुद्भवान् ।
[1]सर्वरोगं निहन्त्याशु भास्करस्तिमिरं यथा ॥ ६९ ॥

स्वर्णभस्म, रससिन्दूर, मोतीभस्म, लौहभस्म, अभ्रकभस्म, मूंगाभस्म, वैक्रान्तभस्म, चांदीभस्म, ताम्रभस्म, बंगभस्म, कस्तूरी, लौंगचूर्ण, जावित्रीचूर्ण, एलवालुकचूर्ण; प्रत्येक द्रव्य एक२ कर्ष लेकर सबको मिला घीकुमार के रससे मर्दन करके केशराज का रस, बकरी का दूध; प्रत्येक की तीन २ दिन भावना देवे। इस रसकी चार रत्ति की गोली बनाकर दोषानुसार अनुपान से सेवन करावें। यह क्षय, खांसी, यक्ष्मा, श्वास रोग, तीनों दोषों से होने वाले बीसों प्रकार के प्रमेह; सब को ऐसे दूर करता है जैसे सूर्य अन्धकार को।

विशेषवचन—आधुनिक मात्रा-१ रत्ती। यह क्षयज वा साहसिक यक्ष्मा में आशानुरूप फल देता है ॥ ६५—६६ ॥

शिलाजत्वादिलौहम्—

शिलाजतु मधु व्योषं ताप्यं लौहरजस्[2]तथा ।
क्षीरे[3]ण लेहितस्याशु क्षयः क्षयमवाप्नुयात् ॥ ७० ॥

शिलाजीत, मुलहठी, सोंठ, मिरच, पिप्पली, स्वर्णमाक्षिकभस्म; प्रत्येक द्रव्य एक २ भाग लें और सबके समभाग (६ भाग) लौहभस्म मिलावें। सबको पीसकर रखें (चाहें तो दो रत्ति भर की गोली जल से घोट कर बना लें)। इसे दूध से खावें। क्षयरोग का नाश होता है।

विशेषवचन—'मधु' का अर्थ यहां शहद भी हो सकता है। तब शिलाजीत आदि पांच द्रव्यों के बराबर लौहभस्म होगी। इसे २ रत्ती मात्रा में लेकर मधु से चटाकर ऊपर बकरी वा गौ का दूध पीना चाहिये। 'लेहितस्य' कहने से तो मधु से शहद ही लेना चाहिये। व्यवहार 'मधु' से मुलहठी लेकर ही है।

शिलाजत्वादि लौह को साहसिक यक्ष्मा में अथवा जब श्लेष्मा के साथ

---

१ 'सर्वान् रोगान्' पा०। २ 'लोहरजांसि यः.' र. चि. पाठः।

३ 'क्षीरेणालोडितस्य' 'क्षीरेण लोहितस्य' 'क्षीरभुक् लेहितस्य' पा०। 'क्षीरभुगचिरेणैव' र. चि. पाठः।

रक्त वा पूय आती हो, उरःक्षत हो, हलका हलका ज्वर हो अथवा वीर्यक्षय से यक्ष्मा हुआ हो तब देना चाहिये। इससे शीघ्र दुर्बलता दूर होती है और क्षीण हुए रक्त आदि धातु पुनः पूर्ण हो जाते हैं।

इस रस से मिलता जुलता यक्ष्मारिलोह नाम से एक योग तन्त्रान्तरों में है—

'मधुताप्यविडङ्गाश्मजतुलोहघृताभयाः।
घ्नन्ति यक्ष्माणमत्युग्रं सेव्यमाना हिताशिना॥'

यहां स्वर्णमाक्षिकभस्म, वायविडङ्ग का चूर्ण, विशुद्ध सूर्यतापी शिलाजीत तथा हरड़ का चूर्ण एक-एक भाग है और लोहभस्म ४ भाग। मात्रा-२ रत्ती। मधु और घी से चटाया जाता है। इसी का नाम 'राजरोगहर लोह' भी है॥

रसरत्नाकर में शिलाजत्वादिलोह नाम से एक और योग कहा है—

'शिलाजतुक्षौद्रविडङ्गसर्पिर्लोहाभयासूतकताप्यभक्षः।
आपूर्यते दुर्बलदेहधातुस्त्रिपञ्चरात्रेण यथा शशाङ्कः॥

पूर्वयोग से इतनी ही भिन्नता है कि यहां रससिन्दूर एक भाग अधिक है। अथवा इसमें कई लोहभस्म भी एक भाग ही डालते हैं। अन्यत्र यही योग वृष्यप्रकरण में है—

'तापीजधातुमधुपारदलोहचूर्ण-
पथ्याशिलाजतुविडङ्गघृतानि लिह्यात्।
एकाग्रविंशतिदिनानि गदार्दितोऽपि
सोऽशीतिकोऽपि रमयेत्प्रमदां युवेव॥"

यदि इसी योग में हरड़ को न डालकर उसके स्थान पर अभ्रकभस्म डाल दें तो पूर्णचन्द्र रस होता है। पूर्णचन्द्र रस वाजीकरणाधिकार में कहा जायगा।

लोहामृत नाम से भी यक्ष्मा में एक योग का प्रयोग होता है, परन्तु यह वही योग है जो पूर्व यक्ष्मारिलोह नाम से कहा है।

'शिलाजतु विडङ्गानि ह्यभया हेममाक्षिकम्।
मृतलोहसमं क्षौद्रैर्निष्कं भुक्तं क्षयापहम्॥
अयं लोहामृतो नाम्ना सन्निपातं नियच्छति॥'

शिलाजत्वादि लोह नाम से योगरत्नाकर में जो योग है उस में केवल शिलाजीत और लोहभस्म ही हैं।

'शिलाजतुयुतं लोहं वल्लं तु विधिमारितम्।
पथ्याशी सेवते यस्तु स यक्ष्माणं व्यपोहति ॥' ७० ॥

कुमुदेश्वरो रसः—

हेमभस्म रसभस्म गन्धकं मौक्तिकन्तु रसपाद[1]टङ्कणम्।
तारकं गरुडमत्र[2] तुल्यकं काञ्जिकेन परिमर्द्य गोलकम् ॥७१॥
मृत्स्नया च परिवेष्ट्य शोषितं भाण्डके लवणगेऽथ पाचयेत्।
एकरात्रमथ सम्पुटेन वा सिद्धिमेति कुमुदेश्वरो रसः।
वल्लमस्य मरिचैः घृताप्लुतै[3] राजयक्ष्मपरिशान्तये पिबेत् ॥७२॥

स्वर्णभस्म, रससिन्दूर, शुद्ध गन्धक, मोतीभस्म; प्रत्येक १ भाग, शुद्ध सुहागा चौथाई भाग, चांदीभस्म, स्वर्णमाक्षिकभस्म; प्रत्येक द्रव्य समभाग ले। कांजी से पीस गोला बनाकर एक छोटे मृत्पात्र में बन्द कर ऊपर कपड़ मिट्टी करे और सुखा कर लवण यन्त्र में दिन भर पाक करे। अथवा मृदुपुट से पाक करें तो कुमुदेश्वर रस सिद्ध हो जाता है। इसकी डेढ़ रत्ति की मात्रा को घी में मरिच चूर्ण डालकर उसके साथ राजयक्ष्मा की शान्ति के लिये पीना चाहिये।

विशेषवचन—इसे पुराने यक्ष्मा में जब रोगी को प्रबलज्वर हो, हृदय कमज़ोर हो–धड़कता हो, निद्रानाश हो, पेट में वायु की प्रबलता हो, पार्श्वशूल हो तब देना चाहिये।

इस रस के प्रचलित पाठ में प्रमाद है। 'रसपादटङ्कणम्' के स्थान पर 'रसटङ्कणं तथा' पाठ है जिस का कोई ठीक अर्थ नहीं जंचता। 'रस' का अर्थ 'पारद' होता है अतः कई उस पाठ में पारद भी डालते हैं। परन्तु रससिन्दूर पूर्व कहे जाने पुनः पारद का कहना कोई बहुत अच्छा नहीं। यद्यपि ऐसा

१ 'रसटङ्कणं तथा' इति प्रचलितः पाठः।
२ 'गरुडसर्वतुल्यंक' प्रचलितः पाठः। ३ 'घृतान्वितैः' पा०।

अन्यत्र कई योगों में भी मिलता है अथवा 'रस' का अर्थ 'विष' भी है। अनेकार्थकोष में कहा है—

'रसो जलं रसो हर्षो रसः शृङ्गारपूर्वकः ।
स्वाद्वादिषु च निर्यासे पारदेऽपि रसो विषे ॥'

विष के योग यक्ष्मा में प्रायः लाभकर नहीं समझे जाते। हां कभी कभी प्रारम्भ २ में उनका प्रयोग किया जाता है।

गरुड का अर्थ यहां स्वर्णमाक्षिक किया गया है परन्तु कोषों में कहीं इसका वाचक नहीं। गरुड़ का अर्थ स्वर्ण भी है परन्तु स्वर्णभस्म पूर्व ही कही गयी है। रसकल्पलता नामक पुस्तक में जो अभी अमुद्रित ही है तार्क्ष्य वा गरुड को यशद का वाचक देखा है। यशदभस्म यक्ष्मा में अत्यन्त हितकर भी है। यह हलके हलके ज्वर (९९° वा १००°) को कम करती है। कास श्वास पाण्डुता आदि में भी हितकर होती है। यक्ष्मा में होने वाले रात्रिस्वेद को तो यह तुरन्त दूर करती है। अतः यशदभस्म से इस योग को प्रस्तुत करना उत्तम है; विशेषतः यदि उक्त लक्षण विद्यमान् हों। आजकल व्यवहार स्वर्णमाक्षिकभस्म से ही है। तन्त्रान्तर में कुमुदेश्वर रस का निम्न पाठ है—

' हेमभस्म रसभस्म तुल्यकं मौक्तिकं तु रसपादटङ्कणम् ।
गन्धकं कुरुत सर्वतुल्यकं काञ्जिकेन परिपेष्य गोलकम् ॥
मृत्स्नया च परिवेष्ट्य शोषितं भाण्डके सलवणेऽथ पाचयेत् ।
एकरात्रमथ तं पुटेत वा सिद्धिमेति कुमुदेश्वरो रसः ॥
वल्लमस्य मरिचैर्घृतप्लुतं राजयक्ष्मपरिशान्तये पिबेत् ।
पिप्पलीभिरथवा मधुप्लुतैराज्यगव्यपयसा युतैस्तु वा ॥
पथ्यमस्य मधुमांसतश्चरेच्छालिमुद्गघृतदुग्धमस्तुभिः ।
व्यञ्जनैश्च घृतपाचितैरतिक्षारहिङ्गुरहितैर्घृतैरपि ॥
हृद्यमत्र बलदं हितं हिमं द्वित्रिवारमपि भोजयेद्भिषक् ।
तैलबिल्वमपि कारवेल्लकं राजिकादि रसमारकं त्यजेत् ॥
क्रोधकामपरिवर्जितः शिवं चिन्तयेद्धि करुणामृतार्णवम् ।
भग्नगात्रचिररोगिभोजनं सक्तुकञ्च परिवर्जयेद्भिषक् ॥
सत्त्वमस्ति यदि दैवयोगतस्तर्हि शुद्धवपुषो रसं ददेत् ॥'

इसमें स्वर्णभस्म, रससिन्दूर, मुक्ताभस्म; प्रत्येक १ भाग, शुद्ध सुहागा चौथाई भाग और गन्धक सब के समान है। इन्हें काञ्जिक से पीस गोला बना मृगाङ्करस के सदृश पाक करें वा पुट दें। इसे भी उन्हीं लक्षणों के होने पर प्रयुक्त करते हैं, जिनमें मृगाङ्करस किया जाता है। यह रस रसप्रकाशसुधाकर में भी है वहां इसे वालुकायन्त्र में पाक करने कहा है।

योगरत्नाकर में एक और कुमुदेश्वर है, वह इससे भिन्न है, परन्तु यतः अधिकतर प्रयोग कराया जाता है यहां हम उद्धृत कर देते हैं—

'पारदं शोधितं गन्धमभ्रकञ्च समं समम्।
तदर्धं दरदं दद्यात्तदर्धां च मनःशिलाम्॥
सर्वार्धं मृतलोहञ्च खल्वमध्ये विनिक्षिपेत्।
द्विःसप्त भावना देयाः शतावर्या रसेन च॥
ततः सिद्धो भवत्येष कुमुदेश्वरसंज्ञकः।
सितया मरिचेनाथ गुञ्जाद्वित्रिप्रमाणतः॥
भक्षयेत्प्रातरुत्थाय पूजयित्वेष्टदेवताम्।
यक्ष्माणमुग्रं हन्त्येव वातपित्तकफामयान्॥
ज्वरादीनखिलान् रोगान् यथा दैत्यान् जनार्दनः।
सतताभ्यासयोगेन वलीपलितनाशनः॥'

यह ग्रन्थकार ने रसार्णव से उद्धृत किया है। शुद्ध पारद, शुद्ध गन्धक, अभ्रकभस्म; प्रत्येक १ भाग, शुद्ध शिंगरफ़ आधा भाग, शुद्ध मनःशिला चौथाई भाग; और इस सारे से आधी लोहभस्म; इन्हें यथाविधि मिला शतावर के रस की १४ भावना दे। आधुनिक मात्रा १ रत्ती। इसे मरिच चूर्ण २ रत्ती और ८ रत्ती खांड के साथ मिलाकर दूध वा जल से देते हैं। यह यक्ष्मा की प्रथमावस्था में जब फेफड़े में गुटिकासञ्चय प्रारम्भ ही होता है, दिया जाता है॥ ७१—७२॥

---

१ 'सूतभस्म समहेमभस्मकं मौक्तिकं च रसपादटङ्कणम्। गन्धमत्र कुरु सर्वतुल्यकं चूर्णितं तुषजलेन गोलकम्॥ लेपयेन्मृदुमृदा विशोषितं पाचितं सिकतयन्त्रमध्यतः। वासरैकमथ शीतलीकृतश्चूर्णितो मरिचमाक्षिकैः प्लुतः॥ भक्षितो हि कुमुदेश्वरो रसो राजयक्ष्मपरिशान्तिकारकः॥'

क्षयकेसरीरसः—

त्रिकटुत्रिफलैलाभिर्जातीफललवङ्गकैः।
नवभागोन्मितैस्तुल्यं लौहपारदसिन्दुरम्।
मधुना क्षयरोगांश्च हन्त्ययं क्षयकेशरी ॥ ७३ ॥

सोंठ, मिरच, पिप्पली, हरड़, बहेड़ा, आंवला, छोटी इलायची, जायफल, लौंग; इन में से प्रत्येक द्रव्य का कपड़े से छना हुआ चूर्ण एक २ तोला लें। सारा चूर्ण नौ तोला हुआ। इसमें साढ़े चार तोला लौहभस्म तथा रससिन्दूर साढ़े चार तोला डालें। सबको पीसकर मात्रा में शहद के साथ चाटें तो क्षय रोग दूर होता है। इसका नाम क्षयकेशरी रस है।

विशेषवचन—तन्त्रान्तर के अनुसार इसे बकरी के दूध से पीसकर २ रत्ती की गोलियां बना लेनी चाहियें। जब यक्ष्मा में रोगी का मल पतला हो उस समय लाभ करता है।

भैषज्यरत्नावली के पाठ के अनुसार इसमें रससिन्दूर नहीं डाला जाता, लौहभस्म ही ९ तोले डालते हैं ॥ ७३ ॥

बृहच्चन्द्रामृतो रसः—

रसगन्धकयोर्ग्राह्यं कर्षमेकं सुशोधितम्।
अभ्रं निश्चन्द्रकं दद्यात् पलार्द्धञ्च विचक्षणः ॥ ७४ ॥
कर्पूरं शाणकं दद्यात् स्वर्णं तोलकसम्मितम्।
ताम्रञ्च तोलकं दद्याद् विशुद्धं मारितं भिषक् ॥ ७५ ॥
लौहं कर्षं क्षिपेत् तत्र वृद्धदारकजीरकम्।
विदारी शतमूली च क्षुरकश्च बला तथा ॥ ७६ ॥
मर्कट्यतिबला चैव जातीकोषफले तथा।
लवङ्गं विजयाबीजं श्वेतसर्जरसं तथा ॥ ७७ ॥

---

१ 'नवभागान्वितं लौहं समं सिन्दूरसन्निभम्। छागीदुग्धेन सम्पिष्य वल्लमस्य प्रयोजयेत्। मधुना' भै. र. पाठः।

शाणभागं समादाय चैकीकृत्य प्रयततः ।
मधुना मर्दयेत् तावत् यावदेकत्वमागतम् ॥ ७८ ॥
चतुर्गुञ्जाप्रमाणेन वटीं कुर्य्यात् प्रयततः ।
भक्षयेद्वटिकामेकां पिप्पलीमधुना सह ॥ ७९ ॥

शुद्ध पारा, शुद्ध गन्धक; प्रत्येक द्रव्य एक २ कर्ष लेकर कज्जली करें। फिर अभ्रकभस्म आधा पल, कर्पूर एक शाण, स्वर्णभस्म एक तोला, ताम्रभस्म एक तोला, लौहभस्म एक कर्ष, विधारे के बीज, श्वेतजीरा, विदारीकन्द, शतावर, तालमखाना, बलामूल, कौंच के बीज, अतिबलामूल, जायफल, जावित्री, लौंग, भांग के बीज, सफेद राल; प्रत्येक द्रव्य का चूर्ण एक २ शाण लेकर शहद से मिलाकर पीसें। जब सब एक रस हो जाये तो चार रत्ति प्रमाण की गोली बना ले। एक गोली को पिप्पली चूर्ण और शहद से खावे तो क्षयरोग तथा खांसी आदि अच्छे होते हैं।

यहां पर रसरत्नसमुच्चय में कही मानपरिभाषा के अनुसार कर्ष से एक तोला (९६ रत्ती) ली जायगी। परन्तु बंगाल के वैद्य कर्ष को २ तोला, पल को ८ तोला और शाण को ४८ रत्ती लेकर योग को बनाते हैं। तोला ९६ ही रत्ती का होता है।

इस रस की आधुनिक मात्रा २ रत्ती है। फुप्फुसावरणशोथ (Pleurisy) से उत्पन्न यक्ष्मा में अथवा यक्ष्मा में ही यदि फुप्फुसावरणशोथ हो तब इसे प्रयोग करा सकते हैं। यह वीर्यक्षयज यक्ष्मा में भी अति लाभकर है॥

॥ ७४—७९ ॥

महामृगाङ्को रसः—

निरुत्थभस्म सौवर्णं द्विगुणं भस्मसूतकम् ।
त्रिगुणं भस्म मुक्तोत्थं शुकपुच्छं चतुर्गुणम् ॥ ८० ॥
मृतताप्यञ्च पञ्चांशं तारभस्म चतुर्गुणम् ।
सप्तभागं प्रवालञ्च रसतुल्यञ्च टङ्कणम् ॥ ८१ ॥

---

१ 'दद्यादत्र भिषक्सुधीः' भै. र. पाठः।

सर्वमेकत्र सम्मर्द्य त्रिदिनं लुङ्गवारिणा।
ततश्च गोलकं कृत्वा शोषयित्वा खरातपे ॥ ८२ ॥
लवणैः पात्रमापूर्य्य तन्मध्ये गोलकं क्षिपेत्।
तन्मुखन्तु मृदा रुद्ध्वा पचेद् यामचतुष्टयम् ॥ ८३ ॥
आकृष्य चूर्णयेत् सर्वं चतुःषष्टिविभागतः।
वज्रं वा तदभावे तु वैक्रान्तं षोडशांशिकम् ॥ ८४ ॥
महामृगाङ्कः खलु एष सिद्धः श्रीनन्दिनाथप्रकटीकृतोऽयम्।
वल्लोऽस्य सेव्यो मरिचाज्ययुक्तः सेव्योऽथवा पिप्पलिकासमेतः ८५
तत्रोपचाराः कर्त्तव्याः सर्वे क्षयगदोदिताः।
बल्यं वृष्यञ्च भोक्तव्यं त्यजेत् सूतविरोधि यत् ॥ ८६ ॥
यक्ष्माणं बहुरूपिणं ज्वरगणं गुल्मं तथा विद्रधिं
मन्दाग्निं स्वरभेदकासमरुचिं वान्तिञ्च मूर्च्छां भ्रमिम्।
अष्टावेव महागदान् गरगदान् पाण्ड्वामयान् कामलाः
पित्तोत्थांश्च समग्रकान् बहुविधानन्यांस्तथा नाशयेत् ॥ ८७ ॥

निरुत्थ स्वर्णभस्म एक तोला, रससिन्दूर दो तोला, मोतीभस्म तीन तोला, शुद्ध गन्धक चार तोला, स्वर्णमाक्षिकभस्म पांच तोला, चांदीभस्म चार तोला, प्रवालभस्म सात तोला, शुद्ध सुहागा दो तोला। सबको पीसकर मातुलुंग (बिजौरा) के रस से तीन दिन घोटकर गोला बना तीव्र धूप में सुखावे। फिर नमक से पात्र भरकर उसके मध्य में (लवणयन्त्र) इसका गोला (मूषा में बन्द किया हुआ) धर दे और मुख बन्द कर मिट्टी से सन्धि को

---

१ 'शुद्धं प्रदेयं पूर्वभागिकम्।' भै. र. पाठः।
२ 'तत्समांशकम्' भै. र. पाठः। ३ 'घृतञ्च' पा०।
४ 'श्वासञ्च' पा०। ५ 'गदगणान्' पा०।
६ 'पित्तार्तिं समलग्रहान्' भै. र. पाठः।

लीप दे । पश्चात् बारह घण्टे आग पर पकावे । स्वांगशीतल होने पर निकाल कर चूर्ण कर ले और उस में सारे चूर्ण का चौसठवां भाग हीराभस्म डाल दे । हीराभस्म न हो तो सोलहवां भाग वैक्रान्तभस्म डाले । अच्छी प्रकार घोटकर शीशी में रख ले । यह महामृगाङ्करस सिद्धफल है । इसे श्रीनन्दिनाथ ने प्रकाशित किया है । इस की डेढ़ रत्ति की मात्रा को मरिच और घी से मिलाकर सेवन करें अथवा पिप्पलीचूर्ण मिलाकर भी सेवन की जासकती है । इसके सेवन के समय क्षयाधिकार में कहे हुए पथ्य आदि सब उपचारों का पालन करना चाहिये। बलदायक तथा वृष्य भोजन करे। इसके सेवन के समय वे सब वस्तुएं सेवन न करें जो कि पारा के सेवन करने के समय अपथ्य कही हैं (ककाराष्टक आदि) । इससे अनेक रूपों से युक्त यक्ष्मा भी दूर होता है तथा ज्वर समूह, गुल्मरोग, विद्रधि, मन्दाग्नि, स्वरभेद, कास, अरुचि, वमन, मूर्च्छा, भ्रम, आठों महारोग, गर (संयोगज विष) रोग, पाण्डुरोग, कामला, पित्त से होने वाले सभी रोग तथा अन्य अनेक प्रकार के रोग दूर होते हैं ।

विशेषवचन—भैषज्यरत्नावली के पाठ के अनुसार हीराभस्म १ भाग और अभाव में वैक्रान्तभस्म १ भाग डाली जाती है । तब मात्रा $\frac{1}{2}$ रत्ती से १ रत्ती तक होती है ।

यह यक्ष्मा की उत्कृष्ट औषध है । इससे यक्ष्मा का ज्वर कास उरःक्षत तथा रक्तहीनता शीघ्र दूर होती है । इसे व्याधिविपरीत औषध समझना चाहिये ॥ ८०—८७ ॥

बृहत् क्षयकेसरी—

मृतमभ्रं मृतं सूतं मृतं लौहं तथा[1] रविः ।
मृतं नागश्च कांस्यश्च मण्डूरं विमलं शिला[2] ॥ ८८ ॥
वङ्गं खर्परकं तालं शङ्खटङ्कणमाक्षिकम् ।
वैक्रान्तं कान्तलौहश्च स्वर्णं विद्रुममौक्तिकम् ॥ ८९ ॥

१ 'च ताम्रकम्' पा० । २ 'तथा' भै. र. पाठः । 'मृतम्' पा० ।

वराटं मणिरागश्च राजपट्टश्च गन्धकः ।
सर्वमेकत्र सञ्चूर्ण्य खल्लमध्ये विनिक्षिपेत् ॥ ६० ॥
मर्दयेत् त्वग्निभानुभ्यां प्रपुटेत् त्रिदिनं लघु ।
भावयेत् पुटयेदेभिर्वारांस्त्रींश्च पृथक् पृथक् ॥ ६१ ॥
मातुलुङ्गवरावह्नि-स्वम्लवेतसमार्कव-
हयमारार्द्रकरसैः पाचितो लघुवह्निना ॥ ६२ ॥
वातपित्तकफोत्क्लेशान् ज्वरान् संमर्दितानपि ।
सन्निपातं निहन्त्याशु सर्वाङ्गैकाङ्गमारुतान् ॥ ६३ ॥
सेवितश्च सितायुक्तो मागधीरजसायुतः ।
मधुकार्द्रकसंयुक्तस्तद्व्याधिहरणौषधैः ॥ ६४ ॥
रोगिणां सेवितो हन्ति व्याधिवारणकेशरी ।
क्षयमेकादशविधं शोषं पाण्डुं क्रिमिं जयेत् ॥ ६५ ॥
कासं पञ्चविधं श्वासं मेहमेदोमहोदरम् ।
अश्मरीं शर्करां शूलं प्लीहगुल्मं हलीमकम् ।
सर्वव्याधिहरो बल्यो वृष्यो मेध्यो रसायनः ॥ ६६ ॥

अभ्रकभस्म, रससिन्दूर, लौहभस्म, ताम्रभस्म, सीसकभस्म, कांस्यभस्म, मण्डूरभस्म, रौप्यमाक्षिकभस्म, शुद्ध मनसिल, वंगभस्म, खपरियाभस्म, शुद्ध हड़ताल, शंखभस्म, शुद्ध सुहागा, स्वर्णमाक्षिकभस्म, वैक्रान्तभस्म, कान्तलौहभस्म, स्वर्णभस्म, मूंगाभस्म, मोतीभस्म, कौड़ीभस्म, शुद्ध हिंगुल, कान्तपाषाणभस्म अर्थात् चुम्बकपत्थर की भस्म, शुद्ध गन्धक; प्रत्येक द्रव्य समभाग ले। सबको इकट्ठा कर खरल में चूर्ण करे और चीते के क्वाथ की भावना देकर लघुपुट देवे इस प्रकार तीन वार करे। इसीप्रकार आक की भावना देकर तीन पुट दे। फिर मातुलुङ्ग (बिजौरा), त्रिफला, चित्रक, अम्लवेत, भांगरा, कनेर, अदरक; इनके रसों से पृथक् पृथक् तीन तीन भावना दे। प्रत्येक

भावना के बाद लघुपुट दे। स्वांगशीतल होने पर पीसकर रखें। इसके खाने से वात पित्त कफ के रोग तथा बढ़े हुए ज्वर भी दूर हो जाते हैं। सन्निपात-ज्वर, सर्वाङ्गवात, एकाङ्गवात; इन सबको शीघ्र दूर करता हैं। इसे मिश्री और पिप्पली के चूर्ण के साथ खावें या शहद और अदरक के रस से चाटें। भिन्न२ रोगों की नाशक औषधों के साथ रोगियों के उन२ रोगों को दूर करता है। यह रोग रूपी हाथी के लिये सिंह के समान हैं। ग्यारह लक्षण युक्त क्षय, शोष, पाण्डु, क्रिमि, पांचों प्रकार की खांसी, श्वास, प्रमेह, मेदोरोग, महोदर, अश्मरी, शर्करा, शूल, प्लीहा, गुल्म, हलीमक आदि रोगों का नाश करता है, बल बढ़ाता है, वृष्य है, मेधावर्द्धक तथा रसायन है।

विशेषवचन—मात्रा—½ रत्ती से १ रत्ती तक।

यह यक्ष्मारोग की उत्कृष्ट औषध है। आंत्रशोष आदि में भी यह लाभकर है।

तन्त्रान्तरों में 'शिला' का पाठ नहीं है। कई शिला से यहां शिलाजीत लेते हैं। परन्तु पीछे से पुटपाक करना है अतः शिलाजीत लेना कोई उत्तम नहीं। मनःशिला ही ठीक है। भावनाद्रव्यों में 'वह्नि' से कई नीबू लेते हैं, क्योंकि चित्रक पूर्व कहा गया है। अथवा भल्लातक भी लिया जा सकता है।

बहुधा उक्तविधि से भिन्न प्रकार से भी इसे वैद्य बनाते हैं, वह विधि भैषज्यरत्नावली की टीका में दी गई है। अभ्रकभस्म आदि द्रव्यों को एकत्र मिला चित्रक क्काथ और आक के रस से क्रमशः मर्दन करके तीन दिन मन्द आंच से लघुपुट पाक करते हैं। इसप्रकार दोनों रसों से मर्दन और लघुपुट पाक तीन वार किया जाता है। पश्चात् औषध को पीस कर लोहे की कड़ाही में डाल मातुलुङ्ग का रस देकर मन्द आंच से पकाते हैं। जब वह सूख जाता है तब दूसरा रस डाल दिया जाता है। इसप्रकार उक्त सब रस सुखा लेते हैं और पीसकर प्रयोग कराते हैं॥ ८८—९६॥

क्षयारिः—

भस्मत्वं समुपागतं विकृतकं हेम्ना मृतेनान्वितं

पादांशेन कणाऽऽज्ययेवल्लसहितं गुञ्जोन्मितं सेवितम् ।
यक्ष्माणं ज्वर[1]रोगपाण्डुगुदजान् श्वासञ्च कासामयं ।
दुष्टाञ्च ग्रहणीं क्षत[2]क्षयमुखान् रोगान् जयेद् देहभृत्[3] ॥ ६७॥

वैक्रान्तभस्म चार तोले, स्वर्णभस्म एक तोला, दोनों को पीसकर रखे। इस क्षयारि रस की एक रत्ति की मात्रा को पिप्पलीचूर्ण (दो रत्ति) और घी मिलाकर या मरिचचूर्ण से खावें तो यक्ष्मा, ज्वर, पाण्डु, बवासीर, श्वास, कास, दुष्ट ग्रहणी तथा क्षतक्षय प्रधान रोग (छाती के रोग) दूर होते हैं।

विशेषवचन—आधुनिक मात्र–$\frac{1}{24}$ से $\frac{1}{12}$ रत्ती तक।

यह रसरत्नसमुच्चय तथा रसेन्द्रचूडामणि में वैक्रान्तरसायन नाम से है। उसे ही देखकर प्रचलित पाठ को शोधा है। 'भस्मत्वं समुपागतं विधिकृतं हेमामृतेनान्वितम्' यह इस ग्रन्थ में प्रचलित पाठ है। इसके अनुसार स्वर्णभस्म १ भाग और शुद्ध विष $\frac{1}{4}$ भाग मिलाने का अभिप्राय होता है॥ ६७॥

क्षयसंहारः—

लीढो व्योषवराऽन्वितो विमलको युक्तो घृतैः सेवितो
हन्यात् हृद्गदं[4]दुर्जयं श्वयथुकं पाण्डुप्रमेहारुचिम् ।
शूलार्त्तिं[5] ग्रहणीञ्च गुल्ममतुलं यक्ष्मामयं कामलाम् ।
सर्वान् पित्तमरुद्गदान् किमपरैर्योगैरशेषामयान् ॥ ६८॥

रौप्यमाक्षिक की भस्म लेकर उसे सोंठ, मिरच, पिप्पली, हरड़, बहेड़ा, आंवला; इन सब का चूर्ण तथा घी मिलाकर चाटें तो भयंकर हृदयरोग, सूजन, पाण्डु, प्रमेह अरुचि, शूल, ग्रहणी, गुल्म, यक्ष्मा, कामला; सब प्रकार के पित्त और वायु के रोग शान्त होते हैं। अन्य औषधों से क्या जब कि यही सब रोगों को नाश करता है।

विशेषवचन—रौप्यमाक्षिकभस्म की आधुनिक मात्रा—$\frac{1}{2}$ रत्ती से २ रत्ती तक है।

---

१ 'क्षरणं च' 'जरणं च' पा०। २ 'उरःक्षतमुखान्' पा०। ३ 'देहकृत्' पा०।
४ 'दुर्भगकृज्ज्वरान्' र. र. स. पाठः। ५ 'मूलार्त्तिं ग्रहणीं च शूलमतुलं' पा०।

यह श्लोक रसेन्द्रचूड़ामणि में योग का अनुपान और गुण बताने के लिये कहा है। योग यह है—

' तत्सत्त्वं सूतसंयुक्तं पिष्टीकृत्वा सुमर्दितम्।
विलीने गन्धके क्षिप्त्वा जारयेत् त्रिगुणालकम्॥
शिलां पञ्चगुणां चापि नलिकायन्त्रके खलु।
तारभस्म दशांशेन तावद्वैक्रान्तकं मृतम्॥
सर्वमेकत्र सञ्चूर्ण्य पटेन परिगाल्य च।
निक्षिप्य कूपिकामध्ये परिपूर्य प्रयत्नतः॥'

इसके बाद प्रकृत ग्रन्थ का उक्त श्लोक है। यह वहां विमलरसायन नाम से है। रसरत्नसमुच्चय में भी यही विमलरसायन कुछ पाठभेद से मिलता है। वह पाठभेद प्रमाद पूर्ण ही है।

अर्थात् विमल के सत्त्व और शुद्ध पारद एक-एक भाग को एकत्र मर्दन करके पिष्टी बना लें। एक लोहपात्र में गन्धक को पिघलावें और उसमें उक्त पिष्टी डालकर अच्छीप्रकार घोट कर नीचे उतार लें। कज्जली हो जायगी। यह कज्जली, शुद्ध हड़ताल ३ भाग, शुद्ध मनःशिला ५ भाग एकत्र मिला नलिकायन्त्र में डाल पाक करें। पश्चात् जो औषध प्राप्त हो उससे दसवां भाग रजतभस्म और रजतभस्म के समान ही वैक्रान्तभस्म मिलाकर अच्छी प्रकार घोटें और कपड़े से छान कर शीशी में भर लें। इस विमलरसायन को त्रिकटु चूर्ण त्रिफला चूर्ण (अथवा उत्तम त्रिकटुचूर्ण यह भी अभिप्राय हो सकता है) तथा घी के साथ मिलाकर चटाया जाता है। मात्रा—आधी रत्ती।

यहां यतः विमल का सत्त्व कहा है अतः उसके सत्वपात की विधि का बताना भी आवश्यक है—

' सटङ्कलकुचद्रावैर्मेषशृङ्गस्य भस्मना।
पिष्टो मूषोदरे लिप्तः संशोष्य च निरुद्ध्य च॥
षट्सप्तकोकिलैर्ध्मातो विमलः शशिसन्निभम्।
सत्वं मुञ्चति तद्युक्तो रसः स्यात्तु रसायनः॥'

अर्थात् रजतमाक्षिक को सुहागा, बड़हर के रस तथा मेषशृङ्ग की भस्म के साथ पीस कर मूषा के अन्दर लीप दे पश्चात् सूखने पर मुख बन्द कर छह सात

कोयलों की आंच में धौंकनी से धौंकें तो उसका सत्त्व निकल आता है।

नलिकायन्त्र का नाम आया है अतः उसका लक्षण जानना भी आवश्यक है—

'लोहनालगतं सूतं भाण्डे लवणपूरिते।
निरुद्धं विपचेत्प्राज्ञो नालिकायन्त्रमीरितम्॥'

अर्थात् लोहे की नाली में पारद वा रसौषध को बन्द करके लवणयन्त्र में यदि पकाया जाय तो उसे नालिकायन्त्र कहते हैं। रसरत्नसमुच्चय में बालुकायन्त्र है। पता नहीं क्यों, शेष पाठ छोड़कर गुण और अनुपान के निर्देश करने वाले श्लोक को ही योगवाचक मानकर क्षयसंहार नाम दे दिया है। केवल रजतमाक्षिकभस्म से ही राजरोग में विशेष लाभ नहीं हो सकता। प्रकृतग्रन्थ में योग का पाठ लेखकप्रमाद से ही छूटा है—ऐसा समझना चाहिये॥ ६८॥

रजतादिलौहम्—

भस्मीभूतं रजतममलं तत्समं व्योमचूर्णं
सर्वैस्तुल्यं त्रिकटु सवरं साय आज्येन युक्तम्।
लीढं प्रातः क्षपयतितरां यक्ष्मपाण्डूदरार्शः।
श्वासं कासं नयनजरुजः पित्तरोगानशेषान्॥ ६९॥

चांदीभस्म एक तोला, अभ्रकभस्म एक तोला, त्रिकुटा अर्थात् सोंठ, मिरच, पिप्पली का चूर्ण मिला हुआ दो तोला, त्रिफला अर्थात् हरड़, बहेड़ा, आंवला का चूर्ण भी मिलाकर दो तोला लें। सब के बराबर लौहभस्म मिलावें। इसकी (एक रत्ति की) मात्रा घी से प्रातःकाल खाने से यक्ष्मा, पाण्डु, उदररोग, बवासीर, श्वास, कास, आंख के रोग तथा पित्त के सब रोग दूर होते हैं।

विशेषवचन—यह भी प्रमादपूर्ण पाठ है। प्रतीत होता है कि ग्रन्थकर्ता को इस योग का ठीक पाठ नहीं मिला। उसने अपनी बुद्धि से ही शोधन करके

---

१ 'त्रिकटुकवरं सर्वमाज्येन युक्तम्' र. रा. सु. पाठः।

रजतादिलौह नाम रख दिया है। वस्तुतः यह रौप्यरसायन नाम से रसरत्नसमुच्चय में है–और उसमें रसेन्द्रचूडामणि से उद्धृत है।

'भस्मीभूतं रजतममलं तत्समौ व्योमभानू।
सर्वैस्तुल्यं त्रिकटुकवरं सारघाज्येन युक्तम्॥'

अगला पाठ प्रकृत ग्रन्थ के मूल पाठ के सदृश ही है।

चांदीभस्म १ भाग, अभ्रकभस्म १ भाग, ताम्रभस्म १ भाग और सारे के समान त्रिकटुचूर्ण मिलाने से रौप्यरसायन तय्यार होता है। इसे मधु और घी के साथ चटाया जाता है। मात्रा–१ रत्ती॥ ९९॥

नित्योदयो रसः–

सुशुद्धं पारदं गन्धः प्रत्येकं शुक्तिसम्मितम्।
ततः कज्जालिकां कृत्वा मर्दयेच्च पृथक् पृथक्॥ १००॥
बिल्वाग्निमन्थश्योणाकाः काश्मरी पाटला बला।
मुस्तं पुनर्नवा धात्री बृहती वृषपत्रकम्॥ १०१॥
विदारी बहुपुत्री च एषां कर्षं रसैर्भिषक्।
सुवर्णं रजतं ताप्यं प्रत्येकं शाणमानकम्॥ १०२॥
पलमात्रन्तु कृष्णाभ्रं[1] तदर्द्धञ्च शिलाह्वयम्।
जातीकोषफले मांसी तालीशैलालवङ्गकम्॥ १०३॥
प्रत्येकं कोलमानन्तु वासानीरैर्विमर्दयेत्।
शोषयित्वाऽऽतपे पश्चाद्विदारीरसमार्दितम्[2]॥ १०४॥
द्विगुञ्जाभां वटीं खादेत्[3] पिप्पलीमधुसंयुताम्।
नाम्ना नित्योदयश्चायं रसो विष्णुविनिर्मितः॥ १०५॥
पञ्च कासान् निहन्त्याशु चिरकालोद्भवानपि।

१ 'सिताभ्रकम्' पा०। २ 'विदार्याः पेषयेद्रसैः' पा०।
३ 'द्विगुञ्जां वटिकां कृत्वा पिप्पलीमधुना भजेत्' पा०।

राजयक्ष्माणमत्युग्रं जीर्णज्वरमरोचकम् ॥ १०६ ॥
धातुस्थं विषमाख्यञ्च तृतीयकचतुर्थकम् ।
अर्शांसि कामलां पाण्डुमग्निमान्द्यं प्रमेहकम् ।
सेवनादस्य कन्दर्परूपो भवति मानवः ॥ १०७ ॥

